नं० ४३२८ - घ

मीमांसासूत्रवृत्तिः

पत्राणि २२

नं० ४३२८-घ

मीमांसासूत्रवृत्तिः

नं० ४३२७-घ

पत्राणि १तः४ संख्याकानि अनुपलब्धानि अत एव केवलम् २२ २६

4327

1 to 4 MISSING

F. = 22

न्मप्रत्यक्षं तद्धर्मस्यानिमित्तं विद्यमानोपलम्भनत्वादित्यन्वयः।अनुमानादेरप्युपलक्ष
णमेतत्।अयमर्थः।प्रत्यक्षस्य वर्त्तमानमात्रविषयकत्वान्न धर्मे प्रामाण्यं यद्यपि गोदोहनादिद्रव्य
यागादिक्रियानीचेस्त्वादिगुणश्च धर्मः स च प्रत्यक्षेण गृह्यते तथापि श्रेयःसाधनत्वस्वरूपेणाग्र
हणाददोषः।इदमेव हि धर्मस्वरूपं यच्छ्रेयःसाधनत्वं।अतएव श्येनकयागादिर्न धर्मः।न च यो
गिप्रत्यक्षस्यापि तत्र प्रामाण्यं योगिनोऽनुमानाभावात्।सत्येवानुमानगोचरयावत्सर्वसाक्षात्कम
वत्तेषां ज्ञानं न तु नत्वनुष्ठानधर्मादिगोचरमपि।न च धर्मे विषयमलौकिकसन्निकर्षजन्यं तेषां प्रत्य
क्षं।योग्यसद्भावे सन्निकर्षस्याप्यपेक्षणात्।स तु वा योगिनः तेषां तादृक्सामर्थ्यं तु कुतः न ह्यलौक
स्मिकेतत्।धर्मानुष्ठानादिति चेत्।तत्किमन्तरेणैव धर्मज्ञानं।अपि तेषां धर्मज्ञाने योग्यतासादिति
चेत् न।अनवस्थापत्तेः।तस्माच्चोदनैव शरणं।अनुमानमर्थापत्तिर्वा।यं च मोऽयम धर्म इति विवे
कासमर्थत्वाच्चोदनामेव प्रार्थयते साचेदंगोहृता ऽलमनुमानार्थापत्तिभ्यां इति सिद्धं चोदनैव

प्रमाणं प्रामाण्यस्य स्थलस्त्वात्तदपवादकदोषनिरासस्त्वग्रिमाधिकरणेः करिष्यते ॥४॥ ॥ न
नु न धर्मे चोदनायाः प्रामाण्यं संभवति तस्याः शब्दरूपत्वेन शक्तिग्रहापेक्षित्वात् शक्तिग्रहस्य चलो
कप्रसिद्धगवादौ दृष्टत्वेन लौकिके धर्मेऽसंभवात्। शब्दार्थयोः संबंधस्यानित्यत्वेन पुरुषदोषा
दिरूपकारणदोषस्यापि संभवाच्च। किंच प्रमाणविसंवादादप्यप्रामाण्यं तथाहि। चित्रया यजे
त पशुकाम इत्यादि श्रूयते। न च चित्रायागानुष्ठायिनां फलं दृश्यते। न च कालांतरे तद्भविष्यतीति
वाच्यं। कारणकालेऽज्ञातस्य पश्चाद्भवनस्य मनोरथमात्रत्वात्। किंच शब्दस्यानित्यत्वादपि न
तत्। किं बहुना वेदस्यापि काठकादिसमाख्ययाऽनित्यत्वावगत्या कारणदोषस्य सत्त्वे सर्व
थानु चोदनायाः प्रामाण्यमिति प्राप्ते प्रत्याह। औत्पत्तिकस्तु शब्दस्यार्थेन संबंधस्तस्य ज्ञानमु
पदेशोऽव्यतिरेकश्चार्थेनुपलब्धे तत्प्रमाणं बादरायणस्यानपेक्षत्वादिति। शब्दस्यार्थेन सह
संबंधः प्रत्याय्यप्रत्यायकभावलक्षणः औत्पत्तिको नित्यः। शब्दनित्यत्वस्य वक्ष्यमाणत्वात्

जातिरूपार्थस्यानित्यत्वाच्च। जातिशब्दार्थसंबन्धाकृत्यधिकरणेष्वसुस्पादयिष्यते। एतेन शब्दार्थसंबं
धस्यानित्यत्वादिदोषस्य वारणं तस्य धर्मस्य ज्ञानं ज्ञापकउपदेशो वेदवाक्यमिति यावत्। अतः
संकेतग्रहसंभवादित्याह यद्वा। तस्य संबंधस्य ज्ञानं ग्राहकउपदेशः प्रसिद्धपदसमभिव्याहार
रूपः। प्रभिन्नकमलोदरे मधूनि मधुकरः पिबतीत्यत्र मधुकरपदस्यार्थमजानतोऽन्यपदार्थ
मवगत्य तत्समभिव्याहारात् कमले लग्नं मधुपानं कुर्वति दृश्यमाने भ्रमरे मधुकरशब्दस्य
संगतिग्रहणे लौकिकवाक्यार्थबोधवत् कारीर्या वृष्टिकामो यजेतेत्यादावपि लोकप्रसिद्धार्थवृष्ट्यादिपदा
दिसमभिव्याहारादलौकिकभावनायां विधेः संगतिग्रहणे लौकिकविधिवाक्यार्थबोधोपि संभवतीति
नाबोधकत्वमिति भावः। अनुपलब्धेऽप्रत्यक्षाद्यगृहीतेऽर्थे व्यतिरेको विधिवाक्यजन्यं ज्ञानं नार्थं
व्यभिचरति। एतेन विपर्ययजनकत्वनिरासः। चेन संशयहेतुत्वनिरासः। अनुपलब्ध इत्यनेन
नानुवादत्वनिरासः। तत् तस्माद्द्धलोगृहीतार्थविषयकाभ्रमसंशयाजन्यज्ञानजनकं चोदना

6

वाक्यं तस्मात्तत्प्रमाणं प्रमाणमेवेत्यर्थः। अनपेक्षत्वात्पुरुषान्तरे प्रत्ययान्तरे चापेक्षाराहित्यात् वाक्ये
षु हि त्रैधा पुरुषानुप्रवेशः पदपदार्थसंबंधद्वारेण वा रचना वाक्यार्थसंबंधद्वारेण संदर्शितस्यैव वा
ज्ञातत्वादिवत्सोऽपौरुषेयत्वेन तत्र पदपदार्थसंबंधस्य नित्यत्वमौत्पत्तिकशब्देनोक्तं वाक्यार्थस्य पदा
र्थमूलकत्वं वेदस्यापौरुषेयत्वं चोपरिष्टाद्वक्ष्यते। न च संवादाभावेनाप्रामाण्यं शंक्यं। कारीर्यादौ
समनन्तरमाविर्दृष्टफलके संवादस्यापि सत्त्वात्. सर्वेषां प्रमाणानां स्वतःप्रामाण्येन संवादान
पेक्षणाच्च। बादरायणस्येत्यनेनेदमेव प्रमाणलक्षणमादरणीयं न तु तैर्थिकान्तरोक्तमिति सूचि
तं। तत्सिद्धं चोदना प्रमाणमेवेति। अत्रायं संक्षेपः। प्रमाकरणं प्रमाणमिति प्रमाणसामान्यलक्ष
णं तान्त्रिकाणां तत्र प्रमात्वं यथार्थानुभवत्वं याथार्थ्यं तु तद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं।
अनुभवत्वं तु अनुभवामीति प्रतीतिसिद्धः साक्षात्कारानुमित्युपमितिशाब्दसाधारणः स्मृ
तिव्यावृत्तो जातिविशेषः न त्वगृहीतग्राहित्वं धारावाहिकेऽव्याप्तेरिति तार्किकाः। तन्न। अनुभवा

मीतिप्रतीतिप्रतीतिसिद्धानुभवत्वस्य साक्षात्कारत्व एव सत्वेनानुमित्यादावव्याप्तेः।स्वर्गवह्नी अनु
भवामीतिप्रतीत्यभावे नानुमित्यादौ लसत्वेमोनुभावात्।तस्मादगृहीतग्राहित्वमेवप्रमात्वं।नच
धारावाहिकेऽव्याप्तिः।तत्तत्क्षणविशिष्टस्य घटादेः पूर्वपूर्वज्ञानागृतस्यैवोत्तरोत्तरज्ञानविष ३।३
यत्वात्।इदानीं पश्यामीदानीं स्पृशामीत्यादिप्रतीत्या कालस्यापि षड्इन्द्रियवेद्यत्वस्वीकारात्।का
लोन्यद्व्यचाक्षुषत्वस्यैव रूपकार्यतावच्छेदकत्वात्।अनुभवानुसारेण कार्यकारणभावकल्प
नात्।अन्यथालोक्यवाचाक्षुषत्वस्यैव कार्यतावच्छेदकत्वापत्तेः।उक्तंचाधारावाहिकेषु पूर्वोत्तरोत्तरे
षां कालान्तरसंबंधस्य अगृहीतस्य ग्रहणाद्युक्तं प्रामाण्यं।स च कापि कालभेदोऽतिसूक्ष्मत्वान्न
परामृश्यत इति चेत्। अहो सूक्ष्मदर्शी देवानांप्रियः।यो हि समानविषयया ज्ञानधारया चिर
मवस्थायोपरतः सोनंतरक्षणसंबंधितयाऽर्थं स्मरति।किं मत्र घटोवस्थित इति पृष्टः कथयति
अस्मिन्क्षणे मयोपलब्ध इति।तथा प्रातरारभ्य एतावन्तं कालं मयोपलब्ध इति कालभेदस्यगृहीते

कथमेवं वदेत्। तस्मादस्ति कालपरामर्शः। तदाधिक्याच्चासिद्धमुत्तरे पांशामाण्यमिति। अत एवास्य
न्घट इत्यादौ अर्थस्य स्वरूपस्य नैवभासत्वेन नतु घटादौ नापृथक्कस्य तो स्त्री स्यचुर्योण निषिद्धाः। वस्तु
7 तस्तु तादृशस्थले तावत्कालव्यापिन्येकैव ज्ञानव्यक्तिः। कारणाभेदे कार्याभेदायोगात् तद्भेद
कल्पने मानाभावात्। योग्यविभुविशेषगुणानां त्रिक्षणावस्थायित्वनियमस्य परिभाषामा
त्रत्वात्। अपेक्षाज्ञानस्थले तादृशनियमस्य त्यागस्यावश्यकत्वाच्च। वस्तुतः स्वसमानविषयकज्ञा
नानपेक्षोत्पत्तिकज्ञानत्वमेवागृहीतग्राहित्वं। अतः कालादेरिन्द्रियवेद्यत्वाभावेपि न क्षतिः। दि
नान्तरे गृहीतस्य घटादेर्दिनान्तरे पुनर्ज्ञानेपि प्रमात्वं च। याथार्थ्यमपि लक्षणे देयं तच्च तद्विशेष्य
कत्वावच्छिन्नतत्प्रकारकत्वमेव तेन समुच्चेयो रूप्यमिति ज्ञानस्य वह्निगुञ्जयोर्गुञ्जावह्नीइति ज्ञानस्य च
निरासः। प्रत्यभिज्ञायास्त्वंशे प्रमात्वमिष्टमेवातः पाञ्च स्वसमानविषयज्ञानानपेक्षोत्पत्तिकज्ञा
नत्वे सति तद्वद्विशेष्यकत्वावच्छिन्नतत्प्रकारकत्वं प्रमात्वं। निर्विकल्पकानभ्युपगमोप्यत्र ना

ग्राहिः। तार्किकैरपि तस्य प्रमाप्रमाबहिर्भावइष्टएव। विशेष्यादस्य प्रकारकत्वमेवतदितियु
क्तं। एवं च सोत्रे बादरायणपदमपि स्वारसिकं· अनुमितेरपि वह्नि विशिष्टःपर्वतो विषय इति नाव्या
प्तिः। विधेयताख्यविषयताशालिनएवानुमिनोमीत्यनुव्यवसायज्ञाननियमात्पर्वतमनुमिनोमी
त्यनुव्यवसायापत्तिः। अतएवपर्वतस्यानुमितिविषयत्वेपर्वतमनुमिनोमीत्यनुव्यवसायापत्तिरिति
निरस्तं। एवमुपमितावप्यगृहीतार्थग्राहित्वं बोध्यं। लौकिकशब्दजन्यज्ञानेतु नप्रमा· तस्या निरुक्ताग्र
हीतग्राहित्वाभावेनाप्रमात्वात्। नवाशब्दःप्रमाणं। उक्तप्रमाकरणत्वाभावात्। ज्ञानेप्रमात्वव्यव
हारः शब्दप्रामाण्यव्यवहारश्च तद्वति तत्प्रकारकत्वादिना तद्वत् ज्ञानकरणत्वेन च क्रमेण गौणो
बोध्यः। आप्तत्वं चात्रैवोपयुज्यते वेदस्य प्रमाणं तस्योक्तलक्षणाक्रान्तत्वात्। व्रीहिभिर्यजेतेत्या
दिवाक्यानां यागाद्यंशे सर्ववाक्यानां पदार्थेषु अप्रामाण्यं चेष्टमेव। किंचैतस्य प्रामाण्यस्य स्वतस्त्वं
कारणगुणसंवादार्थक्रियाज्ञानानधीनत्वं अप्रामाण्यस्य तु बाधकज्ञानकारणदोषविसंवादज्ञा

8

नाधीनत्वरूपं परतस्त्वं॰ एवमर्थेन यात्वरूपस्य प्रमाण्यस्यार्थान्यथात्वरूपस्याप्रामाण्यस्य च स्वतस्त्वं
ज्ञानग्राह्यत्वं कारणदोषादिज्ञानग्राह्यत्वं च क्रमेणावोध्यं॰ अन्यथा कुत्रापि प्रामाण्यग्रहो न स्यादित्याद्य
न्यत्र विवेचितं ॥५॥ यदुक्तं शब्दार्थयोर्नित्यः संबंध इति तन्न शब्दानित्यत्वे नास्तीपत्ति ॥ ॥ कर्मेके तत्र द
र्शनात् । क्रियत इति कर्म कार्यं शब्द इत्येके न्यायविदः । नन्वनित्ये शब्दे संबंधिनि संबंधो नित्यः । न च
समवायः संबंध्यनित्यत्वेऽपि नित्योऽस्तीति दृष्टं समपि तथास्यादिति वाच्यं॰ समवाय एव तथात्वं कार
णात् । तत्रैव लाघवादिति केचित् आहुः । वस्तुतो नात्र वैशेषिकः पूर्वपक्षः । किं तु अन्य एव॰ अन्यथा इदि
ष्वकर्तृभूतास्तेऽपि तत्र संगतानीति न शब्दार्थयोर्नित्यः संबंध इति भावः । अनित्यत्वे मानं । तत्र प्र
यत्नोच्चारणकाले दर्शनात् । प्रयत्नतस्तस्य जनि श्रयात् ॰ न च प्रयत्नत्वं व्यंजकत्वेन तदुच्चारदर्शनमुपप
न्नत इति वाच्यं प्राक् सत्त्वे मानाभावात् । किं च अभिव्यक्तिरपि प्रतिबंधनिरासेन संस्कारविशेषा
धानेन वा॰ नाद्यः । प्रतिबंधकानुपलब्धेः । स्तिमितावायवः श्रोत्रमाश्रित्यावस्थिताः शब्दोपलब्धिं
प्रतिबध्नंतीति तेषु प्रयत्नोत्क्षिप्ताः प्रतिकौष्ठ्यैर्वायुभिरपसारितेषु शब्दोपलब्धिरिति चेत् । न । एवं स
ति सर्वगतत्वात् श्रोत्रं प्राप्यावस्थितानां सर्वेषां शब्दानां प्रतिबंधकोत्सारणे युगपत्तत्र श्रवण

पत्तेः। न द्वितीयः। संस्कारोऽपि हि नैकशब्दस्यात् श्रोत्रस्योभयोर्वा। नाद्यः तस्यैकत्वात्। सर्वगतत्वा
दनवयवत्वेन चावयवसंस्कारायोगात्। स्वगुणस्यैव वायुभिः संस्कृत तस्य पाटलिपुत्रेप्युप
लंभापत्तेः। न द्वितीयः। श्रोत्रं हि आकाशमहंकारो दिग्वा। सर्वथाप्यपि सर्वेषामेकश्रोत्राप
सातस्य चैकत्वेनैकदेशस्थध्वनिभिरपि संस्कारात् सर्वेषां शब्दोपलब्धिप्रसंगात्। न तृ
तीयः पक्षद्वयोक्तदोषप्रसंगादिति भावः॥ ॥अस्थानात्॥ ॥न चायं शब्दः उच्चारणोत्तर
मुपलभ्यते तेन च प्रध्वंसत्वकल्पनात् नित्यः सदृश्यर्थः। करोति शब्दात्॥ ॥शब्दं कुरु माकार्षीरिति
शब्दविषयकं करोति शब्दात् अपि सर्पः। स्यात् अंतरे योगापद्यात्॥ स्यात् अंतरे प्राण्यंतरे। नानादेशो
स्थिति यावत् योगापद्यात् उपलंभस्येति शेषः। नानादेशस्यैव भिरुच्चारितो युगपन्ना
नादेशेषूपलभ्यते। न चैवं नित्यस्यैकस्य संभवति। ननु नित्यत्वेप्यनेकत्वादिदमुपपद्यते।
न हि नित्यमेकमेवेति नियमः। न प्रत्यभिज्ञा हि तवनित्यत्वे मानं सा तु यथा ... इत्याद्यतनया
सा ... नानात्व कस्माद्वपीति प्रत्यभिज्ञाबलान्नित्यत्वेन दैक्यमपीति नानादेशेषु युगपदुपल

9 स्थिर्विरुद्धेसाधारणः॥ प्रकृतिविकृत्योऽपि ॥ दध्यन्तेस्वत्रप्रकृतेरविकारस्याविकृतेर्यकार्यस्य
चादर्शनादितिदोषः। नहिविक्रियमाणस्यानित्यत्वंसंभवतीतिभावः। ।हदृष्टिश्चकट
पटमात्रस्य। ।कटपटमात्राउत्पारयितुंवाऽनुपमेनरहद्विर्मेहत्वंदृश्यतेअतोऽवयवजननं
तत्रेतिगम्यते। यस्यव्यादेषमाहात्। अभिव्यंग्यस्यचेतुनेदमुपपद्यते। नहिबहुभिरल्पैर्वा
अभिव्यंग्योघटोऽन्यथोपलभ्यते। उपलभ्यतेघटादिरन्यथावयवान्यबहुत्वयोरि
तिघटादिवदनित्यत्वमेवयुक्तमितिभावः। नचनेदमुक्तंवैपूर्वेयत्किंचिदेवमनंगीका
रात्। नहिशब्दस्यानुपलब्धिंभवतीतिवाच्यंउक्तोत्तरत्वात्। क्रमेणदूषयति॥ सम
नुनच्चादर्शनं॥ तत्रप्रयत्नोत्तरकालेदर्शनंसमंकार्यत्वाभिव्यंग्यत्वयोरितिदोषः। ९
तुरनित्यत्वापनोदकः। अभिव्यंग्यत्वेऽनुमानंवक्ष्यते। यदुक्तमुच्चरितप्रध्वंसीशब्द
इतितत्राहसतःपरमदर्शनंविषयानागमात्॥ ॥सएवायमकारइतिप्रत्यभिज्ञा

पारिस्थिरस्यैवशब्दस्य परमदर्शनं विषयंकृत्वं प्रतिअभिव्यंकानां जनानामनुजनानामनादित्व
र्थे: अयंभाव:। प्रथलोत्तरमेवयतृश्शब्दस्यदर्शनं ततन्नशब्दस्यकार्यत्वं साधयेति। शब्दस्यप्रम
त्वव्यंग्यत्वेनापि न दुपपत्ते:। यत्तु कथमभिव्यंग्यत्वमिति। श्रोत्रसंस्कारेणेति ब्रूम:। श्रोत्रं च कर्ण
शष्कुलीसावच्छिन्नपुरुषं नभोत्येति नातिप्रसंग:। भवतु वा। काशं श्रोत्रं तथापि न दोष: श्रोत्रे
हि न स्वरूपत: संस्कार्यं किं त्वधिष्ठानद्वारेण ततश्च श्रोत्रस्यैकत्वे ऽपि अधिष्ठानभेदात्संस्का
र व्यवस्था- न चैकत्वे श्रोत्रस्य संस्कृते नैकेनाधिष्ठानेन तस्यापि संस्कृतत्वात्सर्वेषामुपल
ब्धि: स्यादिति वाच्यं। भोगायतनेनहि स्वशरीरेणसंस्थानमुपसध्यतेनान्यत्र। शब्दज्ञानानां चाप
मधिष्ठानसंस्कार: प्रधानसमानदेशत्वं चांगानामनुगुणा:। तेन देहान्तरवर्तिन: पुरुषस्य यत्तस्य
देहे निष्पादयितव्यं विज्ञानं तस्य तद्देहगत एव संस्कारो निष्पादको न देहान्तरगतोऽवि

गुणो हि सप्रवेधानविदेशाच्चात् । न तु तथापि संस्कार्यस्यैकत्वात्तेद्वारत्वाश्च संस्कारांगत्वावस्य
देशभेदे किंचित्करः दृष्टं हि बहिरेकत्वात् संस्काराणामानित्यां । कालानामप्युपसद्गोषोमी
यांगत्वमिति चेत् । न । अदर्शनात् । न ह्येकस्मिन्नधिष्ठाने सर्वेषां ज्ञानमुपलभ्यते ऽतः साधारण
10 मपीन्द्रियं विज्ञानसमानदेशं संस्कारसचिवं विज्ञानमुत्पादयति नान्यत्रेति कल्पने नानेति
प्रसंगात् । किं च नैकमेवेन्द्रियं । यद्यप्याकाशमेकमनवयवं च तथापि तस्य प्रादेशिकैर्घ
टादिभिर्यः संयोगास्तेऽपि प्रादेशिका एव । एवं च कर्णशष्कुली संयोगानां प्रतिपुरुषभिन्न
त्वात् तदवच्छिन्नाकाशं । तेषां श्रोत्रत्वात् सत्यपि स्वरूपैकत्वे ऽवच्छिन्नरूपाणां तेषां भिन्नत्वा
द्व्यवस्थासिद्धिः । एतेन हंकारस्यापि श्रोत्रत्वं व्याख्यातं । न चैवमपि परसंस्कृतं श्रो १०
त्रं सर्वेषां ज्ञानं प्रकाशयेदिति वाच्यं । ध्वनमोहितात्वादिसंपर्कादिजातीया विलक्षणास
मर्थ्यात् निष्पद्यते । न तत्र कश्चिदेव ध्वनिः । कश्चिदेव शब्दमभिव्यनक्ति । न सर्वः सर्वमिति

व्यवस्थोपपत्तेः। दृष्टाच समानेंद्रियग्राह्याणामप्यभिव्यंजकव्यवस्था। सा चित्रं तेजो घटा
दीनामेवाभिव्यंजकं न नक्षत्राणां निंबचंदनगंधस्यैवाभिव्यंजिका न गंधांतराणां
किं च शब्दस्य कारपक्षेऽपि न सर्वपुंसामुपलब्धिप्रसंगः। ध्वनीनां प्रादेशिकत्वेन तद्देश
एव शब्दस्य संस्कारात्। संस्कृतेन श्रोत्रेण यस्येंद्रियं सन्निकृष्टं एव शृणोतीति कः प्रमा
णानि व्यपलेकश्चिद्दोषः इति कृतमधिकेन प्रकृतमनुसरामः। यदुक्तं कर्णशष्कुल्यादि
तत्राह। प्रयोगस्य परं ॥ कृतकत्वे कारणं कुर्विति यदुक्तं तत्प्रयोगस्य श्रोत्रस्य
आकाशं कुर्वत्स्वविशेषोपाधिकः करोतीत्यादि इति भावः। एकस्यापि सस्थलतो युगपन्ना
नादेशोपलंभः। कथं तत्राह॥ ॥आदित्यवद्योगपद्यं॥ ॥आदित्य एकत्वे तावन्नानादेश
तित दृष्टांतेन युगपद्दर्शनमुपपद्यत इत्यर्थः। सर्वगतो हि शब्दो भिन्नदेशोर्ध्वाभिमिसंबं

दूरोपि वाद्यमानोपि ज्ञदेशेष वजासतेध्वनयोहि श्रोत्रदेशमागच्छन्तः पिशाब्दं व्यंजयंतः स्वो
त्पत्तिदेशमपि शाब्दं भासयंतीति दूरेनबलाद भ्युपगम्युते। ननु प्राप्यकारि श्रोत्रं न च ध्वनयस्त
त्तिदेशगाः श्रोत्रेण प्राप्यंतदुत्पत्तिकपंचाद्विशिष्टे यहणंश्रोत्रैरिति चेदवधेहि। न वयं श्रोत्रेणातद्दे
शविशिष्टः शाब्दो गृह्यत इति ब्रूमः। श्रोत्रं हि स्वदेशावस्थितं शाब्दं बोधयदपि न तद्देशविशिष्टं बो
धयंति। तावदिकु श्रोत्रप्राप्तोपशाब्यते श्रोत्रेपातत्रहितुं यद्यपि न स्यात तं श्रेपादिशः श्रोत्र
ग्राह्यत्वं तथापि कालवत्शाब्दविशेषणतयातदस्त्येव। एवं च तासां दिशां शाब्द इति विशि
ष्टग्रहणं सिद्धं। ध्वनयश्च क्रमेणामंदीभवंतः प्रत्यासत्त्या दूरतरात्र देशगदागतास्ती
व्रं मंदं मंदतरं च शाब्दं बोधयंतीति बोधविशेषाच्च ध्वनयस्तु सन्निदूराः प्रत्यासन्नादूरादिरूप ११
तानुमानानुहृद्यदेशमागच्छन्ति। तत्र पश्चाच्छाब्दस्य परमार्थ्यं पृष्ठाव्दत्तस्य ग्रहणादि

पि च स्पर्शवत्स्पर्शवद्द्रव्यरूपस्य ग्रहणात् तूष्ण्यसुस्पर्शिदेशस्य च ग्रहणाच्चेन्यायगां संसर्गस्वभाद
वं विधः प्रसयोग्यवर्तिना आदिश्येतावदंतरालेष्वपि शब्दः श्रूयेत इत्यस्मद्दीपिकायां अत्र चाद्दिश्याज
ता ध्वनयः सूक्ष्मा ध्वनीनां द्रव्यत्वं वायुगुणत्वं तु युक्तिसिद्धादिना च गुणत्वमपि त्रयं तन्निरस्ताः
न च गुणत्वपक्षे ध्वनिमहत्वापव एव स्वदेशीयत्वेनोत्पन्नः श्रोत्रदेशमायातीति। वीचीतरंगन्याये
न तार्किकाणां शब्दस्येव वायुगुणस्येन्द्रियसंनिकर्षबोध्यः। एवं च संयुक्तसमवायात् ध्वनिग्र
हणमिति बोध्यं। भाष्ये तु वायवीयाः संयोगविभागा एव व्यंजका इत्युक्तं। ध्वनय एव च लोकेना
दशब्देन व्यवह्रियंते। ननु गुणत्वे आकाशगुणत्वमस्त्विति चेन्न। नानास्पर्शवत्त्वाद्यवच्छिन्ने त
स्मिन्नु सत्वेर्वा अमूर्तत्वेन संनिकर्षाभावात् श्रोत्रेन्द्रियेण ग्रहणानापत्तेः। वस्तुतो वायोरभिघा
न कारणत्वेनावश्यकत्वात् तद्गुणत्वमेवोचितं। एतेन शब्दस्य पाकमाकाशमिति प्रयुक्तं। वर्णा

स्वकनित्यानिद्रव्याणि॰ वर्णा न गुणा घन्यन्यत्वे सति श्रावणत्वात् शब्दत्ववत् । दिक्कालत्ववद्वे
त्यनुमानेनागुणत्वे सिद्धे पक्षविशेषणात् द्रव्यत्वासिद्धेः । दिक्कालयोः श्रावणत्वस्य पुक्षव्येनुभवासिद्धत्वाच्च
12 नासिद्धः । एतेनास्पर्शत्वे सति । एकेंद्रियग्राह्यत्वाद्रूपादिवद्गुणत्वं प्रत्युक्तं । ननु नैव वर्णानां नित्य
त्वं संभवति । वर्णा जनिमाः । सामान्यवत्त्वे सत्यस्मदादिबाह्येंद्रियग्राह्यत्वाद्घटवदित्यनुम
[illegible] त्वेंद्रीयानुमानेन श्रोत्रं नित्यद्रव्यग्राहकं । निरवयवेंद्रियत्वात्
मनोवदिति सत्प्रतिपक्षग्रस्तत्वादसाधकत्वात् । न च श्रोत्रं नित्यद्रव्याग्राहकं नित्यभूतवि
शेषगुणाग्राहकं वा बाह्येंद्रियत्वादिंद्रियत्वाद्वा चक्षुर्वदिति प्रत्यनुमानबाधः । प्रथमा १२
नुमाने नयनस्य नित्यगगनादिग्राहकत्वे न दृष्टांते साध्यवैकल्यात् । द्वितीये त्वधनित्या
ह[illegible]तया सिद्धसाधकत्वात् । व्यक्तिभेदासिद्धौ च स एवायं गकार इति प्रत्यभिज्ञाया अनि
× दिः पनुमाने नानित्यत्वावधारणादिति चेन्न । ६

विषयकल्पनानुनुपपत्तेः। प्रसक्तिद्वाविरोधेपि दुर्वारः॥ न च द्रुतोगकारो विलंबितोगका
र इति विरुद्धधर्मसंसर्गित्वाद्गकारव्यक्तिभेदसिद्धिरिति वाच्यं तस्याः प्रतीतेर्ध्वनिवि
षयतया वर्णविषयत्वाभावे न प्रामाणिकविरुद्धधर्मसंसर्गस्यासिद्धेः। प्रातीतिकस्य च
तस्य माणिक्यकृपाणाद्यौपाधिकस्यानतस्य स्वभेदासाधकत्वात्। एतेनोदात्तत्वादि
प्रतीतिरपि व्याख्याता। नानाव्यक्तिनन्त्र प्रागभावध्वंसकल्पनारूपो वाधकस्तर्कः। प्रत्य
तिविरोधश्चोत्तरसत्रेषु वक्ष्यत इति दिक्। ध्वन्युत्पत्तिश्च नालव्यादिव्यापारात्। एषा
न विशेषो प्रसाद्यमंशेदात्तत्वादिव्यवहारोपि। किं बहुना शब्दानित्यत्वपक्षे। विना
नाशेयोपि च प्रसंगोति तत्समपरिहारंश्च तस्य प्राप्यकारित्वाभावेन वक्त्रमुखादिरूप
देशग्रहणस्य भ्रान्तित्वावश्यकत्वात्। एवं स्थिते वक्ष्यमाणयुक्तिबलेन नित्यत्वमे

वस्तुत्वं शब्दातिरिक्तो नित्यः स्फोटो वर्णैरभिव्यज्यते इत्यादि वैयाकरणमतं तु दूषितं।
न ह्यविरोधो वा वस्तुनि भिन्नो हि स तं भूयस्। यदुक्तं विक्रियमाणत्वादनित्यत्वं तत्राह॥ ॥धा
तोरन्तरं विकारः॥ ॥यथा कटं चिकीर्षुस्तृणान्यादत्ते न तु रत्नाय कारे प्रयुक्तो हि का
रादानं स्यं भवति परमते गुणत्वात् स्वमते विभुत्वेन द्रव्यान्तरानारम्भकत्वात् तु अधिजन्त्रद्ध्य
13 त्रेति भिन्नावयवेभ्योऽभ्याद्वावितिभावः। व्याकरणं तु साधुत्वमात्र ज्ञापकं। न प्रकृतिविका
रभावबोधकं जनकत्वाभियुक्ताः। उपायाः शिक्षमाणानां बालानामुपलालनाः। अ
सत्ये वर्त्मनि स्थित्वा ततः सत्यं समीहिते इत्याहुः। यदुक्तं वर्त्तकत्वान्महत्त्वं तत्राह। १२
नादवृद्धिः परा॥ ॥नादो ध्वनिस्तस्य वृद्धिः शब्दस्यानुपपद्यमानावयवत्वेन महत्त्वानुप
पत्तेर्बहुभिर्भेरीनिर्घोषणोच्चार्यमाणो नादैः सर्वतः कर्णशष्कुलीं व्याप्नुवद्भिः शब्दो महा

नितिक्रमो न तु तस्य महत्त्वमिति भावः। एवं परमतमनूद्य दूषयित्वा स्वमतमाह॥ ॥नित्यस्तु
स्याद्दर्शनस्य परार्थत्वात्॥ ॥तुरवधारणे। नित्य एव शब्दः स्यात् दृश्यन्ते। न नष्टाच्छब्दादिति द
र्शनमुच्चारणं तस्य परार्थत्वादर्थप्रत्यायनार्थत्वात्। न ह्युच्चरितनष्टाच्छब्दस्य नाशोऽन्यस्मा
न्नष्टाच्छब्दादर्थप्रतीतिसंभवति क्षणिकग्रहाभावादित्यर्थः॥ ॥सर्वत्र यौगपद्यात्॥ सर्वत्र सर्वे
व्यक्तिषु यौगपद्यात् बोधस्येति शेषः। गोशब्द उच्चारिते युगपत्सर्वासां गवां प्रतीतेरा
नुभविकत्वेनाकृतिवचनत्वं शब्दस्यावसीयते। न चाकृत्या नित्यशब्दस्य संबंधः। कर्तुं
शक्यः। नित्यत्वे तु पूर्वपूर्वव्यवहारात्संबन्धावग्रह इत्यर्थः॥ ॥संख्याभावात्॥ ॥दशकृत्वो
शब्दमुच्चारयतीति संख्याया अभावात्। दशकृत्व उच्चारयतीति प्रतीतेश्चैकस्यापि बोधः।
॥अनपेक्षत्वात्॥ कारणापेक्षितेति शेषः। यथा हि घटादिकं समवाय्यसमवायिनिमित्ते

ध्योत्पत्तेनन्नाशो वनस्पतिः। नैवं शब्दस्य समवाय्याद्यभावादित्यर्थः ननु वायुकार
णकः शब्दो वायुसंयोगविभागैर्जायमानत्वात् वायुरापद्यते शब्दतामिति मीमांसाकृदुक्त
मिति नत्राह॥ ॥प्रख्याभावाच्च योगस्य॥ ॥एकवचनं जात्यभिप्रायं योगस्यानां वाय्व
वयवानां प्रख्याया उपलब्धेरभावात् यथा पटादौ तन्त्ववस्तादवयवा उपलभ्यन्ते नै
वं शब्दे इत्यर्थः। न च वायुरपि स्पार्शनं प्रत्यक्षः किं तु तदीयस्पर्श एवातो न तदोपदूतिवा
यं वायुं स्पृशामीति प्रतीतेस्तस्यापि प्रत्यक्षत्वानुस्पर्शमात्रोपलम्भात् तत्र संभवाच्च न च वानुस्पृते
स्पर्शकल्पनेन निस्तारः एवं कल्पनायां प्रमाणाभावात् प्रयोगस्येति पाठे वाद्यवयवयोगस्ये ५४
त्यर्थो बोध्यः॥ ॥लिङ्गदर्शनाच्च॥ ॥वाचा विरूपनित्यये त्यादिवाक्यं सहानुवादकलिङ्गद
र्शनाच्चेत्यर्थः॥१८॥ ननु तथापि वाक्यार्थे धर्मे चोदनायाः प्रामाण्यं न संभवतीति पूर्वपक्षयति

उत्पत्तौ वावचनाः स्युरर्थस्यातन्निमित्तत्वात्॥ ॥ उत्पत्तौ वाक्यार्थरूपधर्मोत्पत्तौ अवचनाः पदानि वा
क्यानि पदार्था वा न समर्थाः कुतः अर्थस्य वाक्यार्थबोधस्य अतन्निमित्तत्वात् तन्निमित्तत्वाभावात् प
दवाक्यपदार्थबोधजन्यत्वाभावादिति भावः॥ यद्वा॥ उत्पद्यत इत्युत्पत्तिर्वाक्यार्थो धर्मः अवचनाः
अप्रमाणानि अर्थस्य वाक्यार्थस्यातन्निमित्तत्वात् पदाद्यप्रमाणकत्वादित्यर्थः॥ वाशब्द एवकारा
र्थः अवचना एवेत्यर्थः॥ अयं भावः॥ न संपदपदार्थसंबंधस्यौत्पत्तिकत्वादुक्तव्यवहारात्तदेवार्थावगतिः
वाक्यार्थरूपे धर्मे तु पुरुषापेक्षयैव प्रामाण्यमप्रामाण्यमेव वा तथाहि प्रत्येकं पदानि वाक्यार्थबोध
यन्ति तत्समूहो वा वाक्यं वा पदार्था वा॥ नाद्यः॥ अदृष्टजातपदानां वाक्यार्थविशेषेषु संकेतग्रह
भावेन तत्संभवात्॥ अत एव न द्वितीयस्तृतीयो॥ संकेतमनपेक्ष्य बोधकत्वे तु व्युत्पत्तिवैयर्थ्यं
बालानामपि बोधप्रसंगश्चेति॥ प्रत्याहारान्तर्भूतानां क्रियार्थेन समाम्नायोऽर्थस्य तन्निमित्तत्वा
त्॥ ॥ तेषु सिद्धपदार्थेषु भूतानां वर्तमानानां पदानां क्रियार्थेन भावनार्थेन सह समाम्नायो॥

दृश्यते किमेतावता तत्र ह अर्थस्य वाक्यार्थबोधस्य तन्निमित्तत्वात् पदार्थनिमित्तकत्वात् । अत्र
यं समाधिमभिसंधिः । पदैरभिहिताः पदार्था एव वाक्यार्थं बोधयंतीति ननु पदानां वाक्यस्य वा तत्र व्या
पारः पदार्थबोधनेनैव कृतार्थत्वात् । अत एव सर्वस्यापि वाक्यश्रवणे तदविहितस्य वाक्यार्थ
न च बोधः । दीर्घवाक्ये एकदेशादि विस्मरणेऽपि पदार्थस्मृतिशालिनो वाक्यार्थबोधस्य । न च प
15 दार्थानां वाक्यार्थे संबंधग्रहाभावेन नेदमुपपद्यत इति वाच्यं । वाक्यार्थे लक्षणायां संबंध
ग्रहस्यानुपयोगात् । एतेन वेदार्थधर्मसंतानाप्रसिद्धेर्नैव संबंधग्रहः संभवतीति सर्वेषामप्रामा
ण्यमिति परास्तं । न च अव्युत्पन्नस्य वाक्यार्थप्रत्ययप्रसंगः पदपदार्थसंबंधग्रहस्यावश्यकत्वा प
त् । समभिव्याहारस्य ज्ञाननियामकत्वेन नातिप्रसंगोऽपि एवं वाक्यार्थबोधस्य पदार्थमूलत्वे ५१
न निर्मूलत्वाभावात् पुरुषापेक्षाभावाच्च निष्प्रत्यूहं धर्मे वाक्यार्थप्रामाण्यं । चोदनायाः इति ।
लोके तन्यथापि सोऽहं ॥ ॥ लोके सन्निधिमात्रप्रयोगसन्निकर्षः स्यात् ॥ ॥ लोके पुनः

त्वनिमानांतरेणागृहीतेर्थे नियमाभ्युपगमाद् अयोगनियमात् । प्रयोगस्य पुरुषसंबंधः स्यात् वेदार्थस्य तु नैवमानां
तरयोग्यत्वमिति भावः ।७। तथापि वेदः पौरुषेयो वाक्यत्वात् भारतवदिति पूर्वपक्षयति ॥ ॥वेदांश्चैके संनि
कर्षं पुरुषाख्याः ॥ ॥एके वेदान् संनिकर्षं संनिकृष्टकालान् वदंति । निर्दोषः पतस्तद् इति च पैप्पलादं
काश्यपं काठकमिति पुरुषेण ख्यापं तद् इति पुरुषाख्याः । अनया हि समाख्यया वेदे पुंसंबंधो वगम्य
ते । न चेयं प्रवचननिमित्ता तस्य साधारणत्वे न समाख्यानिमित्तत्वायोगात् । कर्तृत्वे तु सोपप
द्यतेतरां । स्यादेतदेवं वाक्यरचयितृत्वं हि वाक्यकर्तृत्वं तच्चैकस्यैवाध्येतॄणां तु तादृक्कृष्णाद्वोच्चार
यितृत्वेपि न स्यात्तत्र । अत एव रघुवंशादिवाक्यधारयितृष्वपि नास्मासु कर्तृत्वव्यवहारः । न
च वर्णानां नित्यत्वस्योपपादितत्वान्न पूर्वपक्षोपपत्तिरिति वाच्यं । आनुपूर्व्यं नित्यत्वस्य मानांत
रापरिच्छिन्नविरचितत्वस्य वाक्यत्वात् । अनित्यदर्शनाच्च ॥ बबरः प्रावाहणिरकामयतेस

नित्यस्यार्थस्य वेदे दर्शनादिनोर्थः पूर्वं वेदो नासीदित्येवमागमादित्यर्थः । प्रत्याह । उक्तंतु शब्दपूर्वत्वं ।। ।।तुः
पूर्वपक्षनिरासार्थः । स्पाद्वधाद्देनात्र यथा वृद्धान्न्यंषा वाध्ययनमुच्यते । तत्पूर्वत्वमुक्तमनुमीयतेध्य
यनस्येतिशेषः । विवादाध्यासितं वेदाध्ययनं अध्ययनपूर्वकं अध्ययनत्वादिदानींतनाध्ययनव
16 दित्यनुमानात् नैव वेदस्य प्रथमः । कश्चिदध्येता येन सकर्तृकः स्यादित्यर्थः ।। समाख्यानमुप
पादयति ।। ।।आख्याप्रवचनात् ।। ।।प्रवचने एवातिशययोगेन काठकादिसमाख्योपपत्ती
रित्यर्थः । अनित्यदर्शनादिस्तूक्तं समाधत्ते ।। ।।परं तु श्रुतिसामान्यमात्रं ।। यत्परं पदमुक्तमनित्यदर्श
नं तत् श्रुतिसामान्यमेव । तयोरेवार्थत्वात् । प्रावाहणिपदेन प्रवाहणिस्य वायोरभिधानेन
बबरपदस्यानुकरणपरत्वेन चनत्सद्दोष इत्यर्थः । ननु तथापि गावो वा एतत्सत्रमासत तस्
र्पाः सत्रमासते साहीनां जरद्गवादिवाक्यवदनन्वितार्थानां प्रमत्तगीतसदृशानां वाक्यानां १६
वेदे उपलंभात्कथं कृत्स्नस्य वेदस्य प्रामाण्यमितिशंकां प्रसंगान्निराकरोति ।। ।।कृते वा वि

नियोगः स्यात् कर्मणा संबंधात्। वाक्याद्रः शंकानिरासार्थः॥ ॥कृते कर्मणीति। नियोगः स्यात् प्रयासाद्वा
द्यागावत्स्यादीनामिति शेषः। कर्मणा संबंधात् तत्संनिधिपठितत्वात् तत्कालावगमश्च स्तुतेः स्यर्येत्वमे
वामिति भावः। वक्ष्यते चैतद्विस्तारेण। समन्त्वादितिपाठे तु प्रयाजादिकर्मसंनिधिपठितवाक्यस्य
तत् स्तुतिपरत्वं तपैतेषामपीत्यर्थः। अनुमाननिराकरणं त्वेवं। किं निदं पौरुषेयत्वेनापुरुषाधीनोत्पत्ति
कत्वेनोच्यमानांतरेणार्थमुपलभ्य रचितत्वं नाद्यः सिद्धसाधनात्। आकाशादिवन्नित्यानां सर्वेषामपि
कालतो देशतश्च क्रमशून्यानां वर्णानामनित्यो च्चारणप्रतिपत्तिक्रमविशिष्टानां पूर्वपूर्वक
मानुस्मृतिनिमित्तकसदृशोच्चारोच्चरस्कमवतां वेदवाक्यानां पुरुषाधीनोत्पत्तिकत्वात्। न द्वि
तीयः मालतीमाधवादिवाक्यसाधारणपापत्तेर्दृष्टिविषयमाणत्वात्। किं च पुरुषोपि कस्तावदा
भिप्रेतः। अनीश्वरश्चेतनमात्रं वा योगी वा ईश्वरो वा। नाद्यः। अनीश्वरीयधर्मादिज्ञानस्य वेदं तम
त्वेनानन्यकल्पत्वासंभवात्। न द्वितीयः। तदनभ्युपगमात्। अभ्युपगमे वा किं तन्मानांतरं प्रेम

धर्माधर्मादिग्रसीयेतान नावद्बाह्येंद्रियं तज्ज्ञानितसाक्षात्कारस्य धर्माद्यगोचरत्वात् धर्मा-
द्यदयोग्यत्वात् । नापि मनः । तज्जनितज्ञानस्यात्मयोग्यतद्गुणातिरिक्ताविषयत्वात् । न च स-
दादिज्ञानस्यात् तथात्वेपि विवेकवैराग्यादिबहुगुणशालिनां तेषां तादृक्ज्ञानप्राप्तिरिति वे-
17 न । एवं सति वेदस्यानादित्वेनास्मदिष्टापौरुषेयत्वसिद्धेः । नहि तेषां विवेकवैराग्यादिकं
वेदाध्ययनतदर्थानुष्ठानमंतरेणासंभवति । त्वयेष्यते वा । आकस्मिकत्वापातात् । न ते-
नीयः । ईश्वरासिद्धेः । वेदान्तसिद्धावन्योन्याश्रयात् अनुमानस्याप्रयोजकत्वेनेष्टेश्वरा-
साधकत्वात् । अभ्युपेत्यादीश्वरं ब्रूमः । ब्रह्मस्वयंभुवा चाविरूपनि सुमा· अनादिनिधनानि
सा वागुत्सृष्टा स्वयंभुवेत्यादिश्रुतिस्मृतिभिः स्वयंभूरेव भगवान् वेदो गीतस्त्वयापुरा मया वा ३
द्याऋषिपर्यन्ताः स्मर्तारोस्य न कारकाः इति पुराणवचनेन च वेदानां नित्यत्वावगमेनेश्व-

रकत्वस्यकल्पनायोगात्तदर्थ्यासिद्धिस्तूपास्यत्वेननुउत्कृष्टत्वेनेयत्तून्नचैषामन्यपरत्वा
न्नैष्फल्यमिति सच्चासिद्धिरितिचेन्न । अन्यपराणामपिमानांतरप्राप्तिविरोधयोः सतोस्त्वार्थप्र
माण्याभ्युपगमात् । अतएवविशिष्टविधेः विशिष्टविशेषणोभयपरत्वेवाक्यभेदापत्त्या विशि
ष्टमात्रपरत्वेपि विशेषणांशेपि प्रामाण्यमिष्यतएव देवताधिकरणे । अत्रार्थाबाधितार्थबो
धकत्वं हि प्रामाण्यं नतु तात्पर्यघटितमपि पूर्वान्यप्रमापकत्वव्याप्तेः । नचान्यपरस्यापिवज्र
हस्तः पुरन्दर इत्याद्यर्थवादस्य स्वार्थेपि प्रामाण्ये देवताधिकरणविरोधः देवताधिकर
णे विग्रहांगीकारे यागस्यैकस्मिन्संप्रदानीभूतेंद्रादिविग्रहस्यागमनादिना मंडपभंगा
द्यापत्त्या मानांतरविरोधस्यैवोक्तत्वात् । विग्रहादेर्निषेधनाकांक्षितत्वेन तत्र वाक्यता
त्पर्याभावप्रतिपादनेन तदधिकरणानामसर्योद्ध्वा । पन्तु त्र मोदेदाअजायंताग्नेकीवेद

वायोर्यजुर्वेदः सूर्यात्सामवेद इति वाक्यं न तु स्मृतिपुराणयुक्तमुपपद्यं हि न वहुतरानि सत्त्व नीतपा
दकश्रुति विरोधादृग्मादीनां च विग्रहाभावे न वेदकर्तृत्वासंभवान्नखार्य्यप्रमाणं किन्तु विधि
तो श्रैस्त्वादेरर्थवाद एवेति बोध्यं। एतेन तस्माद्यज्ञादित्यादिश्रुतयोपि व्याख्याताः। न च
18 समाख्ययापौरुषेयत्वासिद्धिः। सत्र कारणोव समाहितत्वात्। यदुक्तं कर्तृलक्षणा समा
ख्येति। तत्रोच्यते। नेयमध्यापितृरूपकर्तृभिरपि हेनामाचक्षीरन्। प्रकर्षेण वचन म न
न्यसाधारणं कठादिभिरनुष्ठितं स्यात्। तथाहि समाख्याता रो भवंति। स्मर्यते च वै
शंपायनः सर्वशाखाध्यायी कठः पुनरिमां केवलां शाखामध्यापयाम् बभूवेति
स बहुशाखाध्यापिनां संनिधौ एकशाखाध्यायी ऽन्यां शाखामनधीयानः सा
श्रोत्रियत्वाद साधारणमुपपद्यते विशेषणमिति वासिष्ठोऽमंत्र इत्यवृतित्तेच हव्यासिष्ठदर्शनमि १८
मित्तकमेवेत्यनुक्रमण्यामेव विदितमेव। एतेन वेदव्याख्यातारः प्रणीतानि प्रमाणान्येव सन्तिवा सा.र

कर्तृत्वादित्यनुमानमपि निरस्तं। भवद्वेदानामस्मदाद्यप्रणीतत्वादस्मदप्रणीतत्वमनुमेयमिति वाच्यं।
आत्माकाशादौ व्यभिचारात्। अथ भूतव्यक्तेसतीति विशेषणान्नायं दोष इति चेत्। आस्मदप्रणीतत्वमात्र
स्योक्तस्यापि न वेदेष्वंगीकारात्। न च पाखंडागमानामपौरुषेयत्वं स्यादिति वाच्यं प्रणेतॄ
णामर्थेषूपलम्भरचितत्वस्य सौगतैरेव स्वीकारात् प्रसिद्धेश्च। वर्णानित्यत्वानुमानस्य पूर्वमेव दू
षितत्वाच्च न तेनापि पौरुषेयत्वसिद्धिः। किं च। वेदस्यापि पौरुषेयत्वे संप्रदायाविच्छेदस्य स्मर्यमा
णकर्तृकत्वादात्मवदिति सत्प्रतिपक्षोपि। न च स्वरूपासिद्धिः। कांसांस्वकप्रवर्तकत्वेन स्मर्यमाणस्य
यविच्छेदाभावात्। उक्तं कुसुमाञ्जलौ पूर्वं ह्यमिति सूत्रान्तरा। एतेन जीर्णकूपादिषु मुक्तकश्लोकेषु चा
पौरुषेयत्वापत्तिर्निरस्ता। एतेन भारतदृष्टान्तोऽपि निरस्तो वेदितव्यः। तत्र कर्तृस्मरणस्य
ष्टत्वात्। वेदकर्तृप्रतिपादकश्रुत्यादीनां पूर्वमेव गतेरुक्तत्वात्। अनादिपरम्परा
भावेनालोकसत्तादिवाक्यवत्प्रामाण्यापत्तिरिति चेन्न प्रमाणानां स्वतः प्रामाण्यमनुपगमात्
अनादित्वाभावेऽप्यनाप्तसंबंधाप्रामाण्यप्रतिबंधस्यादेशकालस्फुटत्वात्। अन्यथानाप्तप्रणीत

स्यात् तत्प्रणीतत्वेऽपि मोव र्णा वि स त्वेन प्रयुक्तत्वादित्यलं । तस्माद्बोधकत्वात् सप्रयोजनत्वादनि-
रपेक्षत्वाच्च चोदनाया धर्मे प्रमाणमेव सैव च प्रमाणमिति सिद्धं । चोदनालक्षणोऽर्थो धर्म इति ॥ ॥
इति वेदांतिमहादेवकृतायां मीमांसासारसंग्रहे प्रथमेऽध्याये प्रथमः ॥ ॥१॥ ॥७॥ ॥स्वयंप्रकाशानं-
दोच्छिन्नसर्वेदांतिसम्पदः । महादेवो गुरोर्वागांघ्रिं व्याचष्ट प्रणितास्ततैः ॥१॥ ॥ननु सर्वस्यापौरु-
षेयत्वे । नार्थवादमंत्रनामधेयात्मकस्य वेदस्य धर्मे प्रामाण्यं धर्मं प्रति सप्रयोजक-
त्वात् । तथाहि । तैत्तिरीयसंहितायां श्रूतस्य वायुर्वै क्षेपिष्ठा देवता वायुमेव स्वेन भागधेये-
नोपधावति स एवैनं भूतिं गमयतीत्यादेर्वेदस्य । यत तन्नदृष्टं तं सम भवदित्यादेश्च वाक्य-
१९ स्य स्वतो धर्मप्रमापकत्वं नास्तीति स्पष्टं । न च संनिहितेन वायव्यं श्वेतमालभेतेत्यनेनै-
कवाक्यतयाऽपि तत्संभवति विशिष्टभावनाविधानेन भूतार्थप्रतिपादनेन च विध्यर्थ- १९
वादयोर्निराकांक्षत्वेनैकवाक्यताया एव वा योगात् । लोके आख्यायिकारूपाणाम्

विपश्चितांबहुशाउपलब्धेःप्रयोजनवदर्थपरत्वाभावेपिविशिष्टार्थप्रतिपादनमात्रेणाप्याम्नायो
प्रयोजनसंभवात्।जपपारायणयोर्नियोगतःसंभवेनफलवत्त्वसंभवाच्च।नचाध्ययनविधिना
कृत्स्नस्यवेदस्यप्रयोजनवदर्थपर्यवसानेऽत्राभाकेपंचिद्दृष्टार्थतासंभवेत्स्वर्गोनयुक्तइति
वाच्यं।दृष्टार्थताऽसंभवस्यैवोक्तत्वात्।सिद्धान्तेपिक्वचिद्दृष्टार्थत्वस्यस्वीकारात्।न
चार्थवादानामाकांक्षाऽभावेपिविधिभिर्निषेधैश्चप्रवर्तनायानिवर्तनायचप्राप्तस्या
प्राशस्त्यबोधकार्थवादानपेक्षणादेकवाक्यतासंभवतीतिवाच्यं।विधिनिषेधा
भ्यांएवेष्टसाधनत्वानिष्टसाधनत्वावगमेनप्रवृत्तिनिवृत्तिसिद्धेः।किंचार्थवा
दानप्राशस्त्यमप्राशस्त्यंवाप्राक्याबोधयंतिमुख्यार्थमात्रप्रतिपादनात्।लक्षणाया

त्वेनस्यबोधकत्वेएकवाक्यतायां सिद्धायां तत्स्वरूपस्याप्राप्तस्याप्राप्तस्यापरत्वांसिद्धेश्च प्राप्ता
स्या प्राप्तस्यापरत्वे एकवाक्यते सम्बन्धाश्रयापत्तेः । एवं मंत्रनामधेययोरपीति पूर्वपक्षयति ।
20 ॥ ॥आम्नायस्य क्रियार्थत्वादानर्थक्यमतदर्थानां तस्मादनित्यमुच्यते ॥ ॥आम्नायस्यैव
वेदस्य क्रियार्थत्वात् विशिष्टभावनाबोधकत्वात् चोदनासूत्रेणोपक्रमात् तस्य ज्ञानमुपदे
शादिति मध्ये परामर्शात् तद्भूतानामपि सत्रोपसंहाराच्च पूर्वपक्षनिर्णीतेस्यादिः । अतदर्था
नां भावनातदङ्गव्यतिरिक्तार्थानामानर्थक्यं धर्माधर्मरूपार्थशून्यत्वं तस्मादनि संधका
सिद्धं धर्माधर्मयोः प्रामाण्यमुच्यते मया पूर्वपक्षिणानिषेधः । किं त्वनार्थवादानां स्वा 20
र्थेऽपि न प्रामाण्यं किमुत धर्मे इत्याह पंचभिः ॥ ॥शास्त्रदृष्टविरोधाच्च ॥ ॥अत्र द्वंद्व
सश्रूयमाणाः प्रत्येकमभिसंबध्यन्त इति न्यायात् शास्त्रविरोधात् दृष्टविरोधात् स्मा

न्न दृष्टविरोधात्रे स्वर्गोपलभ्यतो हिरण्यं हस्तेभवस्य पाटण्डानीति विधिसंन्निहिते हस्तेनम
तो न्नतवादिन्नीति वाक्येयथा श्रुतेन धर्मे प्रामाण्ये। स्तेयं कर्तव्यमन्नतवदनं कर्तव्यमिति
विपरिणामकल्पनेषाण्ह्न विरोधः। न चात्र कल्पः शु व चः। न्न ह्नाकल्प्यतनयावैषम्यात्
अस्माल्लोकादुत्क्रम्याग्निरादिसं गतो रात्रावांस्यस्तामि सुपपादपिनुमुक्ते स्तस्माद्भूमवा दिश
नेर्द्दिवा दृष्टो नार्चिरर्चिरेवाग्नेर्नक्तं दृष्टोन धूमदृष्ट तत्र प्रवरप्रावृयमाणेयदनमेनो
वदेद्दिवाऽपि नरउत्सार्षेयवरणानुमंत्रणाविधिसंन्निहितेन चैतद्धि होब्राह्मणास्मोवप
नब्राह्मणावेसत्र यद्दृष्टविरोधः दिवार्चिषो नक्तं धूमस्य ब्राह्मणात्वस्यैव प्रसक्तेणात्वो
नात्। प्राग्वंशप्रावृयपलीयोत्त्वायां दक्षिणतोकमांद्रकरोतीति छिद्रकरणाविधिसंन्निहि
ते कोहितद्धेदय घुष्मिन्लोके स्तिवानवेसत्र स्मात्स्य दृष्टविरोधः शास्त्रेणामुष्मिक
फलस्य द्बोधनात्। इहत्वनोभुज्यमानस्य कर्मफलस्यामुष्मिकस्यैवानुभूयमानत्वाद्बे सर्थः।

तथापि फलस्याभावात्॥ ॥गर्गत्रिरात्रब्राह्मणं प्रकृत्य श्रूयते शोभते ऽस्य मुखं य एवं वेद इत्यत्र वे
दोऽसीति वेदानुमंत्रणं प्रकृत्य प्रज्ञातामावाली जायते इत्यत्र च फलाभावादपि न प्रामा
ण्यं। न हि गर्गत्रिरात्रब्राह्मणस्य वेदानुमंत्रणस्य वा मुखशोभा प्रजावान्मुखो वा दृश्यते इत्यर्थः।
॥ ॥अन्यानर्थक्यात्॥ ॥पूर्णाहुत्या सर्वान् कामानवाप्नोति पशुबंधयाजी सर्वान् कामानवा
प्नोतीत्यादीनां स्वार्थे प्रामाण्ये ऽन्यानर्थक्यापत्तेन तु इत्यर्थः॥ ॥अभागिप्रतिषेधात्॥
चयनं प्रकृत्य न पृथिव्यामग्निश्चेतव्यो नांतरिक्षे न दिवीति श्रूयते ऽत्र भागिनानाविहितस्यैव
प्रतिषेधायोग्यस्य चयनस्य चयनायोग्यस्यान्तरिक्षादेर्वा प्रतिषेधकं न प्रमाणं विहि
तप्रतिषेधाप्रसक्तप्रतिषेधायोगादित्यर्थः॥ ॥अनित्यसंयोगात्॥ ॥बबरः प्रावाहणिर
कामयत। इत्यनित्यसंयोगादित्यर्थः॥ १८ सिद्धे पौरुषेयत्वेन [illegible]स्य प्रामाण्याभि २१
सत्संयोगः पर्यंतु श्रुतिसामान्यमित्यत्र परिहृतः संप्रत्येकदेशाक्षेपे पुनरुपोद्घलना

यनदुक्तिरितिनविरोधः। प्रत्याह॥ ॥विधिनात्वेकवाक्यत्वात्स्तुत्यर्थेनविधीनांस्युः।
५२ ॥ ॥तु॥ सर्वेषसन्तुन्। विधिनेतिनिषेधस्याप्युपलक्षणं। विधिनानिषेधेन च सहस्तु
त्यर्थेवादानांनिंदार्थे निंदार्थवादानां चैकवाक्यत्वात्प्रामाण्यमितिशेषः। इदं चमंत्रेनाम्नो
रप्युपलक्षणंबोध्यं मंत्रनाम्नो विध्येकवाक्यत्वद्वारमग्रे प्रतिपादयिष्यति। अर्थवादानां
तदत्रैवाहस्तुत्यर्थेनस्तुतिनिरूपणार्थेन निंदार्थेनेत्यपि। लेपविधीनां निषेधानां चैकवाक्य
त्वेवादाइतिशेषः। अयं भावः। अध्ययनविधिनाफलवदर्थज्ञानार्थमध्ययनं विदधता सर्व
स्यवेदस्यार्थपरत्वबोधनाल्लक्षणयाऽपिइष्टार्थसंभवस्य दृष्टकल्पनमनुचितेति एवं
चाध्ययनविधेरेवलक्षणानात्सर्वत्राह्यक तेनोक्तान्योन्याश्रयाभावात् स्तुतिनिंदार्थवा
दानांविधिनिषेधैकवाक्यतयाविधिनिषेधाभ्यांमिष्टानिष्टसाधनत्वबोधेप्युप[illegible]

षज्जनकं तं यास्तु ति निदं योर्तकैपेक्षात्स्वनेन विधिनिषेधानामर्थवादाकांक्षायाः स्वार्थवत्त्वापार्थ
वाक्यानां विधिनिषेधाकांक्षायामेकवाक्यतामूलभूतायाः सम्भवादिति॥ ॥तुल्यं च सांप्रदायि
कं॥ ॥संप्रदायः प्रयोजनं यस्य धर्मज्ञानस्य तद्गुरूपसदनादि तुल्यं विधीनामर्थवादानां
22 नां चानेनो विधीनामिव तेषामपि प्रामाण्यमेवोचितमित्यभिप्रायः पूर्वपक्षोक्तामनुपपत्तिं
निराकरोति॥ ॥अप्राप्ता चानुपपत्तिः प्रयोगे हि विरोधस्यात् शब्दार्थस्त्वप्रयोगभूतस्त
स्मादुपपद्येत॥ ॥अप्राप्तां चानुपपत्तिं अप्राप्तं चानुपपत्तिमिति च पाठान्तरं ।आद्ये मन्या
महेऽस्य समष्टव्याख्यानमिति शेषः प्रयोगे श्रौतार्थविवक्षायां विधिकल्पनायां वा विरोधोर्थ
स्यत्वं स्त्र विरोधो वा शब्दार्थस्तोयादिः प्रयुज्यते विवक्षीयते निष्ठीयते वेति प्रयोगाने २२
वं भूतशब्दस्यार्थस्तस्मादित्युपसंहारः॥ ननु श्रौतार्थो विवक्षणे विध्यकल्पने च कारणाति वा

क्यानां तत्राह ॥ ॥ गुणवादस्तु ॥ ॥ गुणादस्य स्तुतेर्वादः प्रतिपादनं लक्षणयेति शेषः अजत्क
मप्येतत्सूत्रं सूत्रैनैराकांक्षायस्मायेते । भाष्ये तु पूर्वार्धं स्तुतिरूपोर्थो प्रमाणं भूतो नेनु
ष्टेय इति पूर्वसूत्रव्याख्यामभिप्रेत्य न बनुयत्र । विधेयं स्तुत्यनेन तत्र तत्स्तावकत्वेनार्थ
वादानां गतिः । येन सभ्याख्याया ऽवकाभि श्राग्नि विकर्षैतितौ स्यापो वैष्णं तस्य सादिषु
रूपमित्स्याम्नाके देवस्त्रमवतारितो । गुणात्संबंधादेष वादः । प्रशंतावपूसंबंधित्वेन वेन
स्तावकयो स्तुतिः दृष्टा च संबंधिनि स्तुते संबंधिनः स्तुतिबुद्धिर्यथा ऽस्मकाभि
जनो देवदत्तो ऽस्मकेषु स्तुतेः पाखाने स्तुतं मन्यत इत्यर्थपरतयाप्याख्याते च ।
॥ अवकाश्रावाले । स्तुतौ निंदायां वारुचार्थे सत्यनानापेक्षितै वाप्याप्रौढिवा

देनतोमप्याह॥ ॥रूपात्‌आयातू॥ ॥स्तेनस्यैवमननस्य:अरुन्नचाद्वाव:आयेणा
न्तवादित्याचेसर्पः। पद्मश्रूयतेयत्रापिरजतस्यस्वच्छत्वेनाश्वसादृश्यात्‌
रूपादिसेवनमाध्यायकंबोध्यं॥ ॥दूरभूयस्त्वात्‌॥ तस्माद्धूमएवाग्नेरित्यादा
वपिदूरेभूयस्त्वेनधूमएवदृष्टोनार्चिरित्यर्थः॥अग्निर्ज्योतिर्ज्योतिःसूर्येस्वाहे
23 तिसायंजुहोतिसूर्योज्योतिर्ज्योतिरग्निःस्वाहेतिप्रातरितिमिश्रलिंगकमंत्र
विध्यर्थवादस्यतस्माद्दिवाग्निरादित्यंगतोरात्रावादित्यःस्वामिसस्योपपाद
कंधूमएवाग्नेरितिवाक्यमितिबोध्यं॥ ॥अपराधात्‌कर्तुश्चपुत्रदर्शनं॥ ॥
स्त्रीणांअपराधात्‌व्यभिचाररूपात्‌ब्राह्मणात्वसंशयाद्युपपद्यते॥नन्तुमा २२

स्वब्रह्मपाह्नानमात्रेण ब्राह्मण्यनिर्णयः स्यात्। तत्राह कर्तुर्जनयितुर्जायेति शेषः पुत्रस्यैनि
मातामहस्त्रापितुः पुत्रो येन जातः स एव स ह्यस्यं तेः अप्रमत्तास्यन तत्तु मेनमिसा द्विवाज्ञ्
लिङ्गं बोध्यं अब्राह्मणोपि ब्राह्मणो भवति प्रवरानुमंत्रणेनेति नस्यस्कृतिः॥ ॥आकालि
के प्रश्न॥ ॥आकालिके तात्कालिके फले ईप्सालोकानामात्तच्छिद्रकरणमूढुष्येनृलो
केसिवानवेसनवकूप्याहूपते छिद्रकरपाहि सद्योद्धृम चैकृशानिवर्तकामितिन
स्यस्कृतिः आकालिकेति पाठे कालिकं विप्रकृष्टं न तद्विरुपर्यो बोध्यः॥ ॥ ॥
विद्याप्रशंसा॥ ॥मुरुक्तो भान्नवसुत्रोस्यितिष्यांऽग्नो त्रिसात्र ब्राह्मणपाह्नानं वेदानु
मंत्रपाह्नानं च समुनद्दस्पर्पेः ब्राह्मणानु खेरमणीयवाकूलस्यैव श्रोमाचातब्रह्मवे
र्वे सद्दानान्नवसुत्रह्मस्य संभवाच्चतस्यापि समता बोध्या॥ ॥सर्वे त्वेमाधिकारिके॥

पूर्णाहुतिप्रभुबंधयोः लंकाद्युपकारकत्वं कर्मणः फलाकांक्षाऽभावेन प्रधानफलस्यैवा
नुवादः सर्वेषां चाधिकारिकं उक्तं तच्च कर्मफलोपहं भवति ह्यंशेनापि प्रधानस्याद्युपप
राफलत्वमिति सर्पसत्रसमा। प्रसंगादन्येषु महत्सु च कर्मसु स्वर्गपदश्रवणाद्विशेषो महत्त्व
24 प्रसक्तापत्तिं निराकरोति॥ ॥फलस्य कर्मनिष्पत्तेस्तेषां लोकवत्परिमाणतः फलवि
शेषः स्यात्॥ ॥फलस्य कर्मभिर्निष्पन्नेस्तेषां कर्मणां परिमाणतोऽल्पमहत्त्वतारतम्यात्
फलविशेषः फलतारतम्यं लौकिकवत् लौकिकसेवादिवत् विचलितहदो विध्यनुरोधेन
फलस्यैव महत्सु कर्मसु तेनैव फलस्य कल्पना। अन्यथाऽर्के चेन्मधु विंदेत किमर्थं
पर्वतं व्रजेदिति न्यायेन महत्सु प्रवृत्त्यभावे विधायकत्वमेव विघटेतेत्यपि च:
ब्रह्महत्याश्वमेधाभ्यां न परं पुण्यपापयोः। आभूतसंप्लवांतां तेन फलं निष्पन्नं तयोर्द्वि २८
जेतिस्मृतिरप्युक्तार्थलिंगं॥ ॥अंगेषु समोऽर्थवत्त्वात्॥ ॥हिरण्यं निधाय चेतव्यमिति

हिरण्यनिधानस्य सर्पत्वान्न पृथिव्यामिवास्य केवलं पृथिवीखननं योग्यान्तरी
क्षघटतुल्यं सर्पकत्वेन खननं निषेधाप्रसक्तः प्रतिषेधानापत्तेर्व्वबरः प्रवाहणिर
कामयते। अत्रापि निःसंवावादिपरत्वस्य पूर्वमेवोक्तत्वादिरसर्पः। प्रयोजनं रात्रि
सत्रादौ स्वर्गः पूर्वपक्षे सिद्धान्ते प्रतिष्ठेति। अत्रेदं बोध्यं। यत्रार्थभावनानां शब्दभा
वनानां वा प्रेरणाविषयत्वबोधमात्र तदन्यथानुपपत्त्या तासां कर्तव्यत्वबोधे
ऽपि शास्त्रयान्यायेन तत्र कर्तव्यत्वबोधस्यैवांशत्रयाकांक्षाभियोजकत्वा
त्। एवं च शब्दभावनानां कर्तव्यताबोधकेनाध्ययनविधिकल्प्येन लिङ्पुरुषप्र
वर्तनां कुर्यादिति विधिनैवैकवाक्यतापर्यवसानानां नानुप्रातिस्विकसर्वविधिभि
रिति केचित्। अन्ये तु प्रातिस्विकविधिभिः सहैकवाक्यत्वमाहुः। गुरवोऽपीदमेव

परिष्कुर्वंति। पश्चती स्यादावपि भावनाप्रतीतौ किं केन कथमाकांक्षादर्शनात् गौर
वेयाभानाभावे न ज कर्तव्यत्वेन भावनाप्रतीतेरेवाकांक्षाप्रयोजकत्वाभावात् लाघ
वात् भावनाप्रतीतेरेवाकांक्षाप्रयोजकत्वात्। अर्थवादाधिकरणे हि लिङा
25 दियुक्तेषु वाक्येषु द्वे भावने अवगम्येते तत्राप्याद्या चरम भावयतीत्यवगम्यते मि
कयार्थवादानां ग्रहणे तद्भावत् स्मिकयालुम्पहाब्यंते इति वार्तिकस्वरसात् [illegible]
वती स्यादो अस्य पसामर्थ्याच्चावतं भावयतीत्यवगम्यते किमित्सपेक्षिते चाभिष
न्ने कर्तव्यं च्चन्यत् किंचिदिति कल्पनासंभवादात्मानमित्येव संबध्यते केने सापे २५
क्षिते भवने कथमित्सपेक्षिते अवयवादिप्रकारेणेति। तत्र त्रयोपि भावनांश
भवनेवपर्यंते व्यापारांतरासंभवादिति भावार्थाधिकरणवार्तिके भावना १८

26 मात्रप्रतीतौ अंशत्रयाकांक्षापूर्वकान्वयोक्तेश्च. तत्रैव घटोत्पत्तेरभिव्यक्ताऽव्य
वहितपूर्वविषयोत्पत्तेरिति कर्तव्यताबलमिति न्यायसुधोक्तेश्चेति। अधिकं त
त्र हूनन्यायरत्नावल्यां शाब्दभावनाविचारेऽवसेयं॥ " " " "

33

मिमांसासूत्रव्यारव्या दीधीती

श्लोक ४००

२६